दह्यते इत्येतदेव सद्ब्रह्म सत्याभिसन्धेतरयोः शरीरपातकाले च तुल्यायां सत्सम्पत्तौ विद्वान् सत्सम्पद्य न पुनर्व्याघ्रदेवादिदेहग्रहणायावर्त्तते,, इति भा० ।

**असदध्येतृ** पु० असत् निषिद्धशास्त्रमधीते अधि-इङ् तृच् । स्वशाखां परित्यज्यान्यशाखाध्येतरि शाखारण्डे । "स्वशाखां यः परित्यज्य अन्यत्र कुरुते श्रमम् । शाखारण्डः स विज्ञेयोवर्ज्जयेत् तं क्रियासु चेति" स्मृतिः तथाध्ययननिषेधात्तस्यासदध्येतृत्वम् । स्वशाखाध्ययनोत्तरम् क्रमेणान्यशाखाशास्त्रान्तराद्यध्ययनकर्त्तृत्वे तु न असदध्येतृत्वम् ।

**असदागम** पु० विरोधे न०त०। १सच्छास्त्रभिन्ने नास्तिकादिशास्त्रे २असतः द्रव्यस्यागमे च दुष्टद्रव्यलाभे च कर्म० ३दुष्टे आगमे। "सप्त वित्तागमाधर्म्यादायोलाभः क्रयो जयः। विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेत्युक्तधर्म्मोपायभिन्नः सदागमस्तद्भिन्नः असदागमः ।

**असदाचार** पु० अभावे न०त० । १सदाचाराभावे न०ब० । २सदाचारशून्ये त्रि० । सदाचारश्च वेदादिशास्त्रानुसारी आचारः सतामाचारश्च ।

**असदृश** त्रि० न०त० । अयुक्तरूपे अननुरूपे । "यदुक्तवत्यसदृशं वैदेही पश्चिमं वचः" भा०व०प० २७८ अ० । स्त्रियां ङीप् ।

**असद्ग्रह** पु० असति अविद्यमाने वस्तुनि ग्रहः आग्रहः । बालादीनाम् (आवदार) इति ख्याते १आग्रहभेदे । ६त० । २मिथ्याज्ञाने शुक्तिकारजतमित्यादिज्ञाने च ।

**असद्धेतु** पु० असन् व्यभिचारादिदोषवान् हेतुः । न्यायोक्ते व्यभिचारादिदोषयुक्ते हेतौ । यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायःपिण्डे वह्नेः सत्त्वेन व्यभिचारात् धूमसाधने वह्निहेतोर्दुष्टत्वादसत्त्वम् एवमन्यत्राप्यूह्यम् । हेतुदोषाश्च सामान्यतः पञ्चविधाः "अनैकान्तोविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययोपदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा० विस्तरो हेत्वाभासशब्दे वक्ष्यते ।

**असद्भाव** पु० सतोविद्यमानस्य भावः अभावे न०त० । १असत्त्वे अविद्यमानत्वे सन् भावः अभिप्रायः विरोधे न०त० । २दुष्टाभिप्राये । ब० ३तद्वति त्रि० ।

**असद्वृत्ति** स्त्री सती वेदादिविहिता वृत्तिःस्वभावस्य अभावे न०त० । १सदाचाराभावे विरोधे न०त० । २निषिद्धाचारे । न०ब० । ३तद्वति त्रि० । [ २तद्वति त्रि० ।

**असद्व्यवहार** पु० असन् दुष्टः व्यवहारः । १दुष्टव्यवहारे न०ब० ।

**असन** पु० अस-क्षेपे-युच् । पीतसालवृक्षे (पेयासाल) "प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता" माघः तालव्यमध्यतापि "वृन्दावने तु विकसितकन्दलदशनैर्घोषति दरीमुखैश्च कन्दलदशनैः" उज्ज्वल० । भावे ल्युट् । २क्षेपणे न० । "तृणनिरसने विनियोगः" भवदेवः । धातूनामनेकार्थत्वात् कर्त्तरि युच् । ३चलनशीले त्रि० "कृशानोरस्तुरसनामुरुष्यथः" ऋ० १,१५५,२, "शर्यामसनामनु द्यून्" ऋ० १,१४८,४ । [ सातलवृक्षे ।

**असनपर्णी** स्त्री असनस्य पर्णमिव पर्णमस्याः गौ० ङीष् ।

**असनि** त्रि० अस-अनि । क्षेपके ऋश्यादि० चतुरर्थ्यां क । असनिकः तत्सन्निकृष्टदेशादौ त्रि० ।

**असन्तति** स्त्री सन्ततिर्धारा अभावे न०त० । तदभावे १विच्छेदे सन्ततिर्धारा वंशश्च न०ब० २तच्छून्ये त्रि० ।

**असन्तान** पु० सन्तानोविस्तारः अभावे न०त० । १विस्ताराभावे सन्तानोवंशोविस्तारश्च न०ब० । २विस्तारशून्ये ३वंशशून्ये च त्रि० । [पशून्ये त्रि० ।

**असन्ताप** पु० अभावे न०त० । १सन्तापाभावे न०ब० । २सन्ता-

**असन्तुष्ट** त्रि० न०त० । सन्तोषशून्ये अधिकलाभेऽपि पुनरन्यधनाशावति "असन्तुष्टा द्विजा नष्टाः सन्तुष्टाः पार्थिवास्तथा" नीतिः । [२सन्तोषशून्ये अधिकलालसावति ॥

**असन्तोष** पु० अभावे न०त० १सन्तोषाभावे तृप्त्यभावे । न०ब० ।

**असन्दिग्ध** त्रि० न०त० । १सन्देहाविषये २सन्देहशून्ये च । "स्वल्पाक्षरसन्दिग्धं सारवत् विश्वतोमुखम् । अस्तोभमनवद्यञ्च सूत्रं सूत्रविदोविदुः" ।

**असन्दित** त्रि० सम्+दो-क्त इत्वम् सन्दितं बद्धं न०त० । बन्धनशून्ये अनिरुद्धे "पतङ्गानसंदितो वि सृज" ऋ० ४,४,१, "असन्दितः परैरनिरुद्धः" भा० ।

**असन्दिन्** त्रि० सन्दा बन्धनं मत्वर्थे इनि न०त० । बन्धनशून्ये । "अदृतं वर्हिस्तस्यावसन्दिनम्" ऋ० ८,१०२,१४ "असन्दिनमबन्धनम्" भा० ।

**असन्धि** पु० अभावे न०त० । व्याकरणोक्तसन्धिकार्य्याभावे सन्धिः पूर्व्वापरवर्णयोः सन्निकर्षविशेषात् वर्णान्यथाभावलोपः उभयोर्मेलनस्थानम् राज्ञामुपायभेदश्च न०ब० । तच्छून्ये त्रि० ।

**असन्नद्ध** त्रि० न सम्यक् नद्धः स्वकार्य्ये क्षमः । दृप्ते गर्व्विते पण्डितम्मन्ये तस्य सम्यक्पटुत्वाभावेऽपि दर्पेण तथात्वेनाभिमानात्तथात्वम् ।

**असन्निकर्ष** पु० अभावे न०त० । १सन्निकर्षाभावे विरोधे न०